Annexure - 9

# स्वरमङ्गला

त्रैमासिकी संस्कृत-शोध-पत्रिका

102

वर्षः - 39 जुलाई-सितम्बर 2014 अङ्कः - 3

॥ राजस्थान संस्कृत अकादमी ॥

भाषासु मधुरा मुख्या दिव्या गीर्वाण भारती

## राजस्थान-संस्कृत-अकादमी

जे 15, अकादमी संकुल, झालाना सांस्थानिक क्षेत्रम्,
जयपुरम् (राजस्थानम्) दूरभाष : 0141-2709120
E-mail: rajasthansanskritacademy@gmail.com

60.

वर्ष : 39 अङ्कः 3
जुलाई-सितम्बर, 2014

स्वरमङ्गला
ISSN-2249-9296

# रघुवंशमहाकाव्यस्य द्वितीयसर्गे शब्दसौन्दर्यम्

– नीलमशर्मा

संस्कृतसाहित्ये कविताकामिनीकान्तः, कविकुलशिरोमणिः, रससिद्धकवीश्वरः कालिदासः सर्वातिशायित्वेन विलसति। तस्य कृतिषु 'रघुवंशम्' श्रेष्ठं काव्यं स्वीक्रियते। महाकाव्येऽस्मिन् कालिदासेन एकोनविंशतिसर्गेषु एकत्रिंशद्-रघुवंशीयनृपाणां (राजादिलीपत आरभ्य अग्निवर्णनृपं-पर्यन्तम्) चरित्रं निजकवित्वशक्त्या बहुविधकौशलेन वर्णितम्। रघुवंश एव दीपशिखावर्णनेन 'दीपशिखा कालिदासः' उपाधिरयं प्रचलितोऽस्ति -

**सञ्चारिणी दीपशिखेव रात्रौ यं यं व्यतीयाय पतिंवरा सा।**
**नरेन्द्रमार्गाट्ट इव प्रपेदे विवर्णभावं स स भूमिपालः।।**[1] इति।

यद्यपि सम्पूर्णमेव रघुवंशमहाकाव्यं समग्रसंस्कृतसाहित्ये उत्कृष्टमहाकाव्यं विद्यते, किन्तु विविधकलाविचक्षणस्य कालिदासस्य रघुवंशमहाकाव्यगतानां सर्वासां विशेषतानामुल्लेख एकस्मिन्लेखेऽतिदुष्करः। अत एव रघुवंशमहाकाव्यस्य द्वितीयसर्गस्य शब्दसौन्दर्यमेवात्र किञ्चिद् निर्दिश्यते।

रघुवंशमहाकाव्यस्य द्वितीयसर्गे सन्तानप्राप्त्यर्थं राज्ञा दिलीपेन कृता कामधेनोः सुताया नन्दिन्याः सेवा, तया प्रसादितया नन्दिन्या वरेण महिष्याः सुदक्षिणाया गर्भधारणमिति वर्णितम्। अस्मिन्सर्गेऽपि कालिदासस्य कवित्वपरिपाको स्फुटतया निरीक्ष्यते। अत्र राज्ञः दिलीपस्य लोकोदात्तं चरित्रवर्णनम्, सिंहदिलीपसंवादयोः नाटकीयसौन्दर्यम्, बाह्याभ्यन्तरप्रकृतेश्चारु चित्रणम्, प्रकृतेः चेतनरूपस्य आलम्बनरूपस्य च शोभनमुपस्थापनम्, 'उपमा कालिदासस्य' उक्तिरियं सार्थकं कुर्वन् उपमया सह अनुप्रास-पुनरुक्तवदाभास-रूपक-उत्प्रेक्षा-अर्थान्तरन्यासेत्यादीनामलंकाराणां मनोरमप्रयोगः प्राप्यते। अन्यच्च वर्ण्यविषयानुरूपे पदावलीप्रयोगे निपुणः कालिदासोऽत्र कस्यचित् शब्दस्य प्रचुरान् पर्यायान् साभिप्रायेण प्रयुक्तवान्, महती विशेषतेयम्।

1. रघुवंशम्, 6/67, (मल्लिनाथकृतसञ्जीवनीटीकोपेतम्, सम्पा. श्रीकृष्णमणिः त्रिपाठी, चौखम्बा सुरभारती प्रकाशनम्, वाराणसी, 2001)